# ಶ್ರೀನೃಸಿಂಹಕವಚಮ್

ನಮಸ್ಕೃತ್ಯ ಜಗನ್ನಾಥಂ ಸರ್ವವಿಘ್ನನಿವಾಕರಮ್ ।
ನೃಸಿಂಹಕವಚಂ ವಕ್ಷ್ಯೇ ಪ್ರಹ್ಲಾದೇನೋದಿತಂ ಪುರಾ ॥ ೧ ॥

ಸರ್ವರಕ್ಷಾಕರಂ ನೄಣಾಂ ಸರ್ವೋಪದ್ರವನಾಶನಮ್ ।
ಸರ್ವಸಂಪತ್ಕರಂ ಚೈವ ಸ್ವರ್ಗಮೋಕ್ಷಪ್ರದಾಯಕಮ್ ॥ ೨ ॥

ಧ್ಯಾತ್ವಾ ನೃಸಿಂಹಂ ದೇವೇಶಂ ಹೇಮಸಿಂಹಾಸನೇ ಸ್ಥಿತಮ್ ।
ವಿವೃತಾಸ್ಯಂ ತ್ರಿನಯನಂ ಶರದಿಂದುಸಮಪ್ರಭಮ್ ॥ ೩ ॥

ಲಕ್ಷ್ಮ್ಯಾಽಽಲಿಂಗಿತವಾಮಾಂಗಂ ವಿಭೂತಿಭಿರುಪಾಶ್ರಿತಮ್ ।
ಚತುರ್ಭುಜಂ ಕೋಮಲಾಂಗಂ ಮಣಿಕುಂಡಲಭೂಷಿತಮ್ ॥ ೪ ॥

ಹಾರೋಪಶೋಭಿತೋರಸ್ಕಂ ರತ್ನಕೇಯೂರಮಂಡಿತಮ್ ।
ತಪ್ತಕಾಂಚನಸಂಕಾಶಂ ಪೀತನಿರ್ಮಲವಾಸಸಮ್ ॥ ೫ ॥

ಇಂದ್ರಾದಿಸುರಮೌಲಿಸ್ಥಸ್ಫುರನ್ಮಾಣಿಕ್ಯದೀಪ್ತಿಭಿಃ ।
ನೀರಾಜಿತಪದದ್ವಂದ್ವಂ ಶಂಖಚಕ್ರಾದಿಹೇತಿಭಿಃ ॥ ೬ ॥

ಗರುತ್ಮತಾ ಚ ವಿನಯಾತ್ ಸ್ತೂಯಮಾನಂ ಮುದಾಽನ್ವಿತಮ್ ।
ಸ್ವಹೃತ್ಕಮಲಸಂವಾಸಂ ಸ್ಮೃತ್ವಾ ತು ಕವಚಂ ಪಠೇತ್ ॥ ೭ ॥

ಉಗ್ರಂ ವೀರಂ ಮಹಾವಿಷ್ಣುಂ ಜ್ವಲಂತಂ ಸರ್ವತೋಮುಖಮ್ ।
ನೃಸಿಂಹಂ ಭೀಷಣಂ ಭದ್ರಂ ಮೃತ್ಯೋರ್ಮೃತ್ಯುಂ ನಮಾಮ್ಯಹಮ್ ॥ ೮ ॥

ನೃಸಿಂಹೋ ಮೇ ಶಿರಃ ಪಾತು ಲೋಕರಕ್ಷಾರ್ಥಸಂಭವಃ ।
ಸರ್ವವ್ಯಾಪೀ ಸ್ತಂಭವಾಸಃ ಫಾಲಂ ಮೇ ರಕ್ಷತಾದ್ಬಲೀ ॥ ೯ ॥

ನೃಸಿಂಹೋ ಮೇ ದೃಶೌ ಪಾತು ಸೋಮಸೂರ್ಯಾಗ್ನಿಲೋಚನಃ ।
ಶ್ರುತೀ ಮೇ ಪಾತು ನೃಹರಿರ್ಮುನಿವರ್ಯಸ್ತುತಿಪ್ರಿಯಃ ॥ ೧೦ ॥

ನಾಸಾಂ ಮೇ ಸಿಂಹನಾದೋಽಸೌ ಮುಖಂ ಲಕ್ಷ್ಮೀಮುಖಪ್ರಿಯಃ ।

ಸರ್ವವಿದ್ಯಾನಿಧಿಃ ಪಾತು ನೃಸಿಂಹೋ ರಸನಾಂ ಮಮ ॥ ೧೧ ॥

ನೃಸಿಂಹಃ ಪಾತು ಮೇ ಕಂಠಂ ಸದಾ ಪ್ರಹ್ಲಾದವಂದಿತಃ ।
ವಕ್ತ್ರಂ ಪಾತ್ವಿಂದುವದನಃ ಸ್ಕಂಧೌ ಭೂಭರನಾಶಕಃ ॥ ೧೨ ॥

ದಿವ್ಯಾಸ್ತ್ರಶೋಭಿತಭುಜೋ ನೃಸಿಂಹಃ ಪಾತು ಮೇ ಭುಜೌ ।
ಕರೌ ಮೇ ದೇವವರದೋ ನೃಸಿಂಹಃ ಪಾತು ಸರ್ವದಾ ॥ ೧೩ ॥

ಹೃದಯಂ ಯೋಗಿಹೃತ್ಪದ್ಮನಿವಾಸಃ ಪಾತು ಮೇ ಹರಿಃ ।
ಮಧ್ಯಂ ಪಾತು ಹಿರಣ್ಯಾಕ್ಷೋ ವಕ್ಷಃ ಕುಕ್ಷಿವಿದಾರಣಃ ॥ ೧೪ ॥

ನಾಭಿಂ ಮೇ ನೃಹರಿಃ ಪಾತು ಸ್ವನಾಭಿಬ್ರಹ್ಮಸಂಸ್ತುತಃ ।
ಬ್ರಹ್ಮಾಂಡಕೋಟಯಃ ಕಟ್ಯಾಂ ಯಸ್ಯಾಸೌ ಪಾತು ಮೇ ಕಟಿಮ್ ॥ ೧೫ ॥

ಗುಹ್ಯಂ ಮೇ ಪಾತು ಗುಹ್ಯಾನಾಂ ಮಂತ್ರಾಣಾಂ ಗುಹ್ಯರೂಪಧೃಕ್ ।
ಊರೂ ಮನೋಭವಃ ಪಾತು ಜಾನುನೀ ನರರೂಪಧೃಕ್ ॥ ೧೬ ॥

ಜಂಘೇ ಪಾತು ಧರಾಭಾರಹರ್ತಾ ಗುಲ್ಫೌ ನೃಕೇಸರೀ ।
ಸುರರಾಜ್ಯಪ್ರದಃ ಪಾತು ಪಾದೌ ಮೇ ನೃಹರಿಃ ಸ್ವಯಮ್ ॥ ೧೭ ॥

ಸಹಸ್ರಶೀರ್ಷಾ ಪುರುಷಃ ಪಾತು ಮೇ ಸರ್ವಶಸ್ತನುಮ್ ।
ಮಹೋಗ್ರಃ ಪೂರ್ವತಃ ಪಾತು ಮಹಾವೀರಾಗ್ರಜೋಽಗ್ನಿತಃ ॥ ೧೮ ॥

ಮಹಾವಿಷ್ಣುರ್ದಕ್ಷಿಣೇ ತು ಮಹಾಜ್ವಾಲಸ್ತು ನೈಋತೌ ।
ಪಶ್ಚಿಮೇ ಪಾತು ಸರ್ವೇಶೋ ದಿಶಿ ಮೇ ಸರ್ವತೋಮುಖಃ ॥ ೧೯ ॥

ನೃಸಿಂಹಃ ಪಾತು ವಾಯವ್ಯೇ ಸೌಮ್ಯಾಂ ಭೀಷಣವಿಗ್ರಹಃ ।
ಐಶಾನ್ಯಾಂ ಪಾತು ಭದ್ರೋ ಮಾಂ ಸರ್ವಮಂಗಲದಾಯಕಃ ॥ ೨೦ ॥

ಸಂಸಾರಭಯತಃ ಪಾತು ಮೃತ್ಯೋರ್ಮೃತ್ಯುರ್ನೃಕೇಸರೀ ।
ಜಲೇ ರಕ್ಷತು ವಾರಾಹಃ ಸ್ಥಲೇ ರಕ್ಷತು ವಾಮನಃ ।
ಅಟವ್ಯಾಂ ನಾರಸಿಂಹಸ್ತು ಸರ್ವತಃ ಪಾತು ಕೇಶವಃ ॥ ೨೧ ॥

ಇದಂ ನೃಸಿಂಹಕವಚಂ ಪ್ರಹ್ಲಾದಮುಖನಿರ್ಗತಮ್ ।
ಭಕ್ತಿಮಾನ್ ಯಃ ಪಠೇನ್ನಿತ್ಯಂ ಸರ್ವಪಾಪೈಃ ಪ್ರಮುಚ್ಯತೇ ॥ ೨೨ ॥

ಪುತ್ರವಾನ್ ಧನವಾನ್ ಲೋಕೇ ದೀರ್ಘಾಯುರುಪಜಾಯತೇ ।
ಯಂ ಯಂ ಕಾಮಯತೇ ಕಾಮಂ ತಂ ತಂ ಪ್ರಾಪ್ನೋತ್ಯಸಂಶಯಮ್ ॥ ೨೩ ॥

ಸರ್ವತ್ರ ಜಯಮಾಪ್ನೋತಿ ಸರ್ವತ್ರ ವಿಜಯೀ ಭವೇತ್ ।
ಭೂಮ್ಯಂತರಿಕ್ಷದಿವ್ಯಾನಾಂ ಗ್ರಹಾಣಾಂ ಚ ನಿವಾರಣಮ್ ॥ ೨೪ ॥

ವೃಶ್ಚಿಕೋರಗಸಂಭೂತವಿಷಾಪಹರಣಂ ಪರಮ್ ।
ಬ್ರಹ್ಮರಾಕ್ಷಸಯಕ್ಷಾಣಾಂ ದೂರೋತ್ಸಾರಣಕಾರಣಮ್ ॥ ೨೫ ॥

ಭೂರ್ಜೇ ವಾ ತಾಲಪತ್ರೇ ವಾ ಲಿಖಿತಂ ಕವಚಂ ಶುಭಮ್ ।
ಕರಮೂಲೇ ಧೃತಂ ಯೇನ ಕರೇ ಸ್ಥಿತಾಸ್ತು ಸಿದ್ಧಯಃ ॥ ೨೬ ॥

ನೃಸಿಂಹಕವಚೇನೈವ ರಕ್ಷಿತೋ ವಜ್ರರಕ್ಷಿತಃ ।
ದೇವಾಸುರಮನುಷ್ಯೇಷು ಸ್ವಾಜ್ಞ್ಯೈವ ಫಲಂ ಲಭೇತ್ ॥ ೨೭ ॥

ಏಕಸಂಧ್ಯಂ ದ್ವಿಸಂಧ್ಯಂ ವಾ ತ್ರಿಸಂಧ್ಯಂ ವಾ ಪಠೇನ್ನರಃ ।
ಪ್ರಾಪ್ನೋತಿ ಪರಮಾರೋಗ್ಯಂ ವಿಷ್ಣುಲೋಕೇ ಮಹೀಯತೇ ॥ ೨೮ ॥

ಸರ್ವಮಂಗಲಮಾಂಗಲ್ಯಂ ಭುಕ್ತಿಂ ಮುಕ್ತಿಂ ಚ ವಿಂದತಿ ।
ದ್ವಾತ್ರಿಂಶತ್ಸಹಸ್ರಾಣಾಂ ಪಾಠಾಚ್ಛುದ್ಧಾತ್ಮನಂ ನೃಣಾಮ್ ॥ ೨೯ ॥

ಕವಚಸ್ಯಾಸ್ಯ ಮಂತ್ರತ್ವಾನ್ಮಂತ್ರಸಿದ್ಧಿಃ ಪ್ರಜಾಯತೇ ।
ಅನೇನ ಮಂತ್ರರಾಜೇನ ಕೃತ್ವಾ ಭಸ್ಮಾಭಿಮಂತ್ರಣಮ್ ॥ ೩೦ ॥

ತಿಲಕಂ ಧಾರಯೇದ್ಯಸ್ತು ತಸ್ಯ ಗ್ರಹಭಯಂ ಹರೇತ್ ।
ತ್ರಿವಾರಂ ಜಪ್ಯಮಾನಸ್ತು ಪೂತವಾರ್ಯಭಿಮಂತ್ರಿತಮ್ ॥ ೩೧ ॥

ಪಾಯಯೇದ್ಯಂ ನರೋ ಮಂತ್ರೀ ನೃಸಿಂಹಧ್ಯಾನಮಾಚರೇತ್ ।
ತಸ್ಯ ರೋಗಾಃ ಪ್ರಣಶ್ಯಂತಿ ಯೇ ವಾ ಸ್ಯುಃ ಕುಕ್ಷಿಸಂಭವಾಃ ॥ ೩೨ ॥

ಕಿಮತ್ರ ಬಹುನೋಕ್ತೇನ ನೃಸಿಂಹಸದೃಶೋ ಭವೇತ್ ।
ಷಣ್ಮಾಸಾತ್ ಫಲಮಾಪ್ನೋತಿ ಕವಚಸ್ಯಾಸ್ಯ ಪ್ರಭಾವತಃ ।
ಮನಸಾ ಚಿಂತಿತಂ ಯತ್ತು ಸ ತಚ್ಚಾಪ್ನೋತ್ಯಸಂಶಯಮ್ ॥ ೩೩ ॥

ಶಕ್ರಾರಿವಕ್ಷಃ ಕರಜೈರ್ವಿದಾರ್ಯ ಕೃತ್ವಾ ಚ ಪಿಷ್ಟಂ ಕರಯೋರ್ವಿಶುದ್ಧಮ್ ।
ತತ್ರೈವ ತೀರ್ಥಂ ಕೃತವಾನ್ ಸುನಾಮ್ನಾ ಕೃತ್ವಾಽಧಿವಾಸಂ ನೃಹರಿಃ ಪ್ರಸೀದತು ॥ ೩೪ ॥

ಸಂಸಾರಸಾಗರಸಮುತ್ತರಣೈಕಮಂತ್ರಂ
ಬ್ರಹ್ಮಾದಿದೇವಋಷಿಪೂಜಿತಸಿದ್ಧಮಂತ್ರಮ್ ।
ದಾರಿದ್ರ್ಯದುಃಖಭಯರೋಗವಿನಾಶಮಂತ್ರಂ
ವಂದೇ ಮಹಾಭಯಹರಂ ನರಸಿಂಹ ಮಂತ್ರಮ್ ॥ ೩೫ ॥

ಗರ್ಜಂತಂ ಗರ್ಜಯಂತಂ ನಿಜಭುಜಪಟಲಂ ಸ್ಫೋಟಯಂತಂ ಹರಂತಂ ।
ದೀಪ್ಯಂತಂ ತಾಪಯಂತಂ ದಿವಿ ಭುವಿ ದಿತಿಜಂ ಕ್ಷೇಪಯಂತಂ ರಸಾಂತಮ್ ।
ಕ್ರಂದಂತಂ ರೋಷಯಂತಂ ದಿಶಿ ದಿಶಿ ಸತತಂ ಸಂಭರಂತಂ ಹರಂತಂ ।
ವೀಕ್ಷಂತಂ ಘೂರ್ಣಯಂತಂ ಕರನಿಕರಶತೈರ್ದಿವ್ಯಸಿಂಹಂ ನಮಾಮಿ ॥ ೩೬ ॥

(ಸ್ತಂಭಾಭ್ಯಂತರಗರ್ಭವಾಸಮಕರೋದ್ಯಃ ಶತ್ರುಸಂಹಾರಕಃ
ಯಃ ಪಂಚಾನನಕಾಂತಿಭದ್ರಸುತನುರ್ಯೋರ್ ಭಕ್ತಚಿಂತಾಮಣಿಃ ।
ಪ್ರಹ್ಲಾದಾದಿಸುಭಕ್ತರಕ್ಷಣಕರೋ ಬ್ರಹ್ಮಾದಿಸಂಸೇವಿತಃ
ಸೋಽವ್ಯಾನ್ಮಾಂ ಶರದಿಂದುಸುಂದರಮುಖಃ ಸಿಂಹಾದ್ರಿಚೂಡಾಮಣಿಃ ॥)

॥ ಇತಿ ಪ್ರಹ್ಲಾದಪ್ರೋಕ್ತಂ ಶ್ರೀನೃಸಿಂಹಕವಚಮ್ ॥

श्रीनृसिंहकवचम्

नमस्कृत्य जगन्नाथं सर्वविघ्ननिवाकरम्।
नृसिंहकवचं वक्ष्ये प्रह्लादेनोदितं पुरा॥ १॥

सर्वरक्षाकरं नृणां सर्वोपद्रवनाशनम्।
सर्वसंपत्करं चैव स्वर्गमोक्षप्रदायकम्॥ २॥

ध्यात्वा नृसिंहं देवेशं हेमसिंहासने स्थितम्।
विवृतास्यं त्रिनयनं शरदिंदुसमप्रभम्॥ ३॥

लक्ष्म्याऽऽलिंगितवामांगं विभूतिभिरुपाश्रितम्।
चतुर्भुजं कोमलाङगं मणिकुङ्डलभूशितम्॥ ४॥

हारोपशोभितोरस्कं रत्नकेयूरमंडितम्।
तप्तकांचनसंकाशं पीतनिर्मलवाससम्॥ ५॥

इन्द्रादिसुरमौलिस्थस्फुरन्माणिक्यदीप्तिभिः।
नीराजितपदद्वन्द्वं शङ्ख़चक्रादिहेतिभिः॥ ६॥

गरुत्मता च विनयात् स्तूयमानं मुदान्वितम्।
स्वहृत्कमलसंवासं स्मृत्वा तु कवचं पठेत्॥ ७॥

उग्रं वीरं महाविष्णुं ज्वलन्तं सर्वतोमुख़म्।
नृसिंहं भीषणं भद्रं मृत्योर्मृत्युं नमाम्यहम्॥ ८॥

नृसिंहो मे शिरः पातु लोकरक्षार्थसंभवः।
सर्वव्यापी स्तंभवासः फालं मे रक्षताद्धली॥ ९॥

नृसिंहो मे दृशौ पातु सोमसूर्याग्निलोचनः।
शृती मे पातु नृहरिर्मुनिवर्यस्तुतिप्रियः॥ १०॥

नासां मे सिंहनादोऽसो मुख़ं लक्ष्मीमुख़प्रियः।
सर्वविद्यानिधिः पातु नृसिंहो रसना मम॥ ११॥

नृसिंहः पातु मे कण्ठं सदा प्रह्लादवन्दितः।
वक्त्रं पात्विंदुवदनः स्कंधौ भूभरनासकः॥ १२॥

दिव्यास्त्रशोभितभुजो नृसिंहः पातु मे भुजौ।
करौ मे देववरदो नृसिंहः पातु सर्वदा॥ १३॥

हृदयं योगिहृत्पद्मनिवासः पातु मे हरिः।
मध्यं पातु हिरण्याक्षो वक्षः कुक्षिविदारणः॥ १४॥

नाभिं मे नृहरिः पातु स्वनाभिब्रह्मसंस्तुतः।
ब्रह्माण्डकोटयः कट्यां यस्यासौ पातु मे कटिम्॥ १५॥

गुह्यं मे पातु गुह्यानां मन्त्राणां गुह्यरूपधृक्।
ऊरू मनोभवः पातु जानुनी नररूपधृक्॥ १६॥

जङ्घे पातु धराभारहर्ता गुल्फौ नृकेसरी।
सुरराज्यप्रदः पातु पादौ मे नृहरिः स्वयम्॥ १७॥

सहस्रशीर्षा पुरुषः पातु मे सर्वशस्तनुम्।
महोग्रः पूर्वतः पातु महावीराग्रजोऽग्नितः॥ १८॥

महाविष्णुर्दक्षिणे तु महाज्वालस्तु नैऋतौ।
पश्चिमे पातु सर्वेशो दिशि मे सर्वतोमुखः॥ १९॥

नृसिंहः पातु वायव्ये सौम्यां भीषणविग्रहः।
ईशान्यां पातु भद्रो मां सर्वमङ्गलदायकः॥ २०॥

संसारभयतः पातु मृत्योर्मृत्युर्नृकेसरी।
जले रक्षतु वाराहः स्थले रक्षतु वामनः।
अटव्यां नारसिंहस्तु सर्वतः पातु केशवः॥ २१॥

इदं नृसिंहकवचं प्रह्लादमुखनिर्गतम्।
भक्तिमान् यः पठेन्नित्यं सर्वपापैः प्रमुच्यते॥ २२॥

पुत्रवान् धनवान् लोके दीर्घायुरुपजायते।
यं यं कामयते कामं तं तं प्राप्नोत्यसंशयम्॥ २३॥

सर्वत्र जयमाप्नोति सर्वत्र विजयी भवेत्।
भूम्यंतरिक्षदिव्यानां ग्रहाणां च निवारणम्॥ २४॥

वृश्चिकोरगसंभूतविशापहरणं परम्।

ब्रह्मराक्षसयक्षाणां दूरोत्सारणकारणम्॥ २५॥

भूर्जे वा तालपत्रे वा लिखितं कवचं शुभम्।
करमूले धृतं येन करे स्थितास्तु सिद्धयः॥ २६॥

नृसिंहकवचेनैव रक्षितो वज्ररक्षितः।
देवासुरमनुश्येशु स्वाज्ञयैव फलं लभेत्॥ २७॥

एकसंध्यं द्विसंध्यं वा त्रिसंध्यं वा पठेन्नरः।
प्राप्नोति परमारोग्यं विष्णुलोके महीयते॥ २८॥

सर्वमंगलमाङ्गल्यं भुक्तिं मुक्तिं च विन्दति।
द्वात्रिंशत्सहस्राणां पाठाच्छुद्धात्मनं नृणाम्॥ २९॥

कवचस्यास्य मन्त्रत्वान्मन्त्रसिद्धिः प्रजायते।
अनेन मन्त्रराजेन कृत्वा भस्माभिमन्त्रणम्॥ ३०॥

तिलकं धारयेद्यस्तु तस्य ग्रहभयं हरेत्।
त्रिवारं जप्यमानस्तु पूतवार्यभिमन्त्रितम्॥ ३१॥

पाययेद्यं नरो मन्त्री नृसिंहध्यानमाचरेत्।
तस्य रोगाः प्रणश्यण्ति ये वा स्युः कुक्षिसंभवाः॥ ३२॥

किमत्र बहुनोक्तेन नृसिंहसदृशो भवेत्।
षण्मासात् फलमाप्नोति कवचस्यास्य प्रभावतः।
मनसा चिन्तितं यत्तु स तच्चाप्नोत्यसंशयम्॥ ३३॥

शक्रारिवक्षः करजैर्विदार्य कृत्वा च पिष्टं करयोर्विशुद्धम्।
तत्रैव तीर्थं कृतवान् सुनाम्ना कृत्वाऽधिवासं नृहरिः प्रसीदतु॥ ३४॥

संसारसागरसमुत्तरणैकमन्त्रं
ब्रह्मादिदेवऋशिपूजितसिद्धमन्त्रम्।
दारिद्र्यदुःख़भयरोगविनाशमन्त्रं
वन्दे महाभयहरं नरसिंह मन्त्रम्॥ ३५॥

गर्जन्तं गर्जयन्तं निजभुजपटलं स्फोटयन्तं हरन्तं।
दीप्यन्तं तापयन्तं दिवि भुवि दितिजं क्षेपयन्तं रसान्तम्।
क्रन्दन्तं रोषयन्तं दिशि दिशि सततं संभरंतं हरन्तं।

वीक्षन्तं घूर्णयन्तं करनिकरशतैर्दिव्यसिंहं नमामि॥ ३६॥

स्तंभाभ्यंतरगर्भवासमकरोदयः शतृसंहारकः
यः पंचाननकांतिभद्रसुतनुर्यो भक्तचिन्तामणिः।
प्रह्लादादिसुभक्तरक्षणकरो ब्रह्मादिसंसेवितः
सोऽव्यान्मां शरदिन्दुसुन्दरमुखः सिंहाद्रिचूडामणिः॥

॥ इति प्रह्लादप्रोक्तं श्रीनृसिंहकवचम्॥